*favourable opportunity.* There are things for which we English rulers of this country have been reproached because it is said that, with the best of intentions, we have in a somewhat pedantic and blundering fashion introduced them into Indian society ; but I can look any one of my Indian friends in the face and say that among those things he cannot reckon the study of the English tongue."

---

## विजनता ।

(*Alexander Selkirk*)

यदिदमिह समस्तं दृश्यतेऽक्ष्णोरत्र तस्मि
न्नधिपतिरहमेकोऽव्याहतो मत्प्रभावः ।
अभित इति च केन्द्रं सर्व्वतोऽप्यासमुद्रं
सकलमृगखगानांस्वाम्ययं केवलोऽहम् ॥

कुत्राधुना विजनते रमणीय-कान्ति
र्या मण्डिता कविगणैर्मुखमण्डली ते ।
प्रज्ञाभिसङ्कुलभवे वसतिर्वरं सा
नैतद्भयावहपदेऽभिलषामि राज्यम् ॥

न मनुज-नयनानां साम्प्रतं गोचरेऽह-
मिह मम भवितव्या निर्ज्जने जीवयात्रा ।
न ललित-नरकण्ठं भूय आकर्णयिष्ये
भवति चकित आत्माचात्र मे स्वस्वरेण ॥

चैवेऽविमे मृगगणा विहरन्ति येऽत्र
त्रासं विहाय वसतो मदिह भ्रमन्ति ।

को नाम वेत्ति कठिनाश्च मनुष्यवृत्ति-
स्तेषान्तु शान्तचरितं जनयत्यशान्तिम् ॥

प्रियजन-सहवासो मित्रता प्रीतिरेव
त्रय इह—मनुजानां देव-दत्त-प्रसादाः ।
यदि विहग इवाहो पक्षयुक्तोऽभविष्यं
सपदि खलु तदेभिः सङ्गमासादयिष्यम् ॥

धर्म्मे स्थिरीकृतमतेश्चरतश्च सत्यं
दुःखानि मे ननु तदा क्षयमागमिष्यन् ।
ज्ञानप्रवीण-सुधियः पुरुषादलभ्यं
यूनां सुखञ्च सरसैर्वचनैः सखीनाम् ॥

त्रिदिव-सुख-युक्ते सन्ति सङ्ख्यातिरिक्ताः
कति कति मणिमुक्ता धर्म्म इत्येव शब्दे ।
रजतकनकदामम्लानिकृन्मूल्यमस्य
न हि धरति धरित्री तुल्यमूल्यञ्च किञ्चित् ॥

एते तु शैलनिचयाः समभूमिखण्डाः
शृन्वन्ति नैव भजनक्षण-घोषि-घण्टाम् ।
देमे प्रवसन्ति च तथा रटनैः समाधे-
र्ह्वंष्यन्ति धा क्षितमुखा न विराम-वारे ॥

अयि पवन तवैव क्रोड़नं साधितोऽहम्-
पुनरपि न मया यः प्रेक्षितव्यः स्वदेशः ।
तत इह वह लोकालोकशून्यप्रदेशे
मम सुख-जनयित्रीं कामपि क्षेमवार्त्ताम् ॥

मित्राणि मे,—पुनरमून्यपि मे स्मरन्ति
वाञ्छन्ति वा सह मया मिलनं कदाचित्।
एकोऽपि तिष्ठति सखा वद मां वद त्वं
जाने न यद्यपि मया न हि दर्शनीयः॥

किमिव विपुलवेगं मानसं कल्पनासु
त्वरितलघुगतित्वादुग्रवाताग्रयायि।
शर इव खरगामी पत्रसंयुक्तपुङ्ख-
स्तदनु हि परिभूतो याति तावन्मयूखः॥

मन्मातृभूमि रिति मे स्मरणं यदास्यान्-
मन्ये तदा परिवृतं स्वमहं सुहृद्भिः।
अत्रान्तरे स्मृतिरहो उदिता निरस्येन्-
नैराश्यवारिणि तु मां पुनरेव वेगात्॥

गत इह तु कुलाये वारिचारी विहङ्गः
स्वपिति गृह इदानीं श्वापदोऽपि स्वकीये।
इति नियमित एवात्रापि विश्रामकालो
मम च निजकुटीरं यातुमेषा हि वेला॥

सर्व्वस्थले विभुदया ननु राजमाना
चिन्तेति शान्तिसुखदामनुभूतपूर्व्वाम्।
आशाविभां विकिरति व्यथितस्य चित्ते
दुःखेऽपि रक्षति जनं निजभाग्यदृप्तम्॥७

HEM CHANDRA ROY
Third year Class.